श्रीः

तैत्तिरीयोपनिषदि द्वितीय प्रश्न प्रारंभः।।

।। हरिः ओ(4)म्।।

सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै। ओं शान्तिश्शान्तिश्शान्तिः।।

अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान्। शुक्रेण ज्योतीँषि समनुप्रविष्टः प्रजापतिश्चरति गर्भेअन्तः। यस्मिन्निदँ सञ्च विचैति सर्वँव्यस्मिन्देवा अधिविश्वेनिषेदुः। तदेव भूतन्तदु भव्यमा इदन्तदक्षरे परमे व्योमन्। येनावृतं खञ्च दिवं महीञ्च येनादित्यस्तपति तेजसा भ्राजसा च। यमन्तस्समुद्रे कवयो वयन्तियदक्षरे परमे प्रजाः। यतः प्रसूताजगतः प्रसूती तोयेन जीवान् व्यचसर्जभूम्याम्। यदोषधीभिः पुरुषान्पशूँश्च विवेश भूतानि चराचराणि। अतः परन्नान्यदणीयस ँहि परात्परँयन्महतो महान्तम्। यदेकमव्यक्तमनन्तरूपँविश्वं पुराणन्तमसः परस्तात्।

(1) । तदेवर्तन्तदु सत्यमाहु स्तदेव ब्रह्म परमङ्कवीनाम्। इष्टा पूर्त बहुधा जातं जायमानँविश्वं बिभर्ति भुवनस्य नाभिः। तदेवाग्निस्तद्वायुस्तथ्सूर्यस्तदुचन्द्रमाः। तदेव शुक्रममृ तन्तद्ब्रह्म तदापस्स प्रजापतिः। सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि। कलामुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः। अर्धमासामास ऋतवस्संवथ्सरश्च कल्पन्ताम्। स आपः प्रदुघे उभे इमे अन्तरिक्षमथो सुवः। नैनमूर्ध्वं न तिर्यञ्चन्न मध्ये परिजग्रभत्। न तस्येशे कश्चन तस्य नाममहद्यशः।

(2) न सन्दृशे तिष्ठति रूपमस्य नचक्षुषा पश्यति कश्चनैनम्। हृदा मनीषा मनसाऽभिक्लृप्तो य एनँविदुरमृतास्ते भवन्ति। अद्भ्यस्सं भूतो हिरण्य गर्भ इत्यष्टौ। एष हि देवः प्रदिशोनुसर्वाः पूर्वो हि जातस्स उगर्भे अन्तः। स विजायमानस्स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतो मुखः। विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात्। संबाहुभ्यान्नमति संपतत्रैर्द्यावापृथिवी जनयन्देव

एकः। वेनस्तत्पश्यन्विश्वा भुवनानि विद्वान् यत्र विश्वं भवत्येकनीळम्। यस्मिन्निदं सञ्च विचैकं स ओतः प्रोतश्च विभु प्रजासु। प्रतद्वोचे अमृतन्नु विद्वान् गन्धर्वो नाम निहितङ्गुहासु।(3) त्रीणि पदा निहिता गुहासु यस्तद्वेद सवितुः पितासत्। स नोबन्धुर्जनिता सविधाता धामानिवेद भुवनानि विश्वा। यत्र देवा अमृतमानशानास्तृतीये धामान्यभ्यैरयन्त। परिद्यावापृथिवीयन्तिसद्यः परि लोकान्परि दिशः परिसुवः। ऋतस्य तन्तुंविततंविचृत्य तदपश्यत्तद भवत् प्रजासु। परीत्यलोकान् परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च। प्रजापतिः प्रथमजा ऋतस्यात्मना SSत्मानमभि संब भूव। सदसस्पति मद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषं। उद्दीप्यस्व जातवेदोSपघ्नन्निर्ऋतिं मम।(4) पशूँश्च मह्यमावह जीवनञ्च दिशोदिश । मानोहिंसीज्जातवेदो गामश्वं पुरुषञ्जगत्। अबिभ्रदग्न आगहिश्रिया मापरिपातय। पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि। तन्नो रुद्रः प्रचोदयात्। तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्। तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात्। तत्पुरुषाय विद्महे सुवर्ण पक्षाय धीमहि।(5) तन्नो गरुडः प्रचोदयात्। कात्यायनाय विद्महे कन्यकुमारि धीमहि। तन्नो दुर्गिः प्रचोदयात्। नारायणाय विद्महे वासुदेवाय धीमहि। तन्नोविष्णुः प्रचोदयात्। सहस्र परमादेवी शतमूला शताङ्कुरा। सर्वं हरतु मे पापं दुर्वा दुस्वप्ननाशनी। अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरा। शिरसा धारिता देवी रक्षस्वमां पदेपदे। उधृतासि वराहेण कृष्णेन शतबाहुना। (6) भूमिर्धेनुर्धरणी लोक धारिणी। मृत्तिकेहन मे पापंयन्मया दुष्कृतंकृतम्। त्वया हतेन पापेनजीवामि शरदश्शतम्। मृत्तिके देहिमे पुष्टित्वयि सर्वं प्रतिष्ठितम्। गन्धद्वारान्दुराधर्षा न्नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्व भूतानान्तामिहोपह्वये श्रियम्। हिरण्यशृङ्गं व्वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्त मसाधूनां पापे भ्यश्च प्रतिग्रहः। यन्मे मनसा वाचाकर्मणा वा दुष्कृतं कृतम्। तन्न इन्द्रो वरुणो बृहस्पतिस्सविता च पुनन्तु पुनः पुनः (7) सुमित्रान आप ओषधयस्सन्तु दुर्मित्रास्तस्मै भूयासुर्योSस्मान्द्वे ष्टि यञ्च वयं द्विष्मः। नमोSग्नयेSप्सुमते नमइन्द्राय नमो वरुणाय नमो वारुण्यै नमोSद्भ्यः। यदपां क्रूरंयदमेध्यंयदशान्तं तदपगच्छतात्।

अत्याशनादतीपानाद्यच्च उग्रात् प्रतिग्रहात्। तन्मे वरुणो राजा पाणिनाह्यवमर्शतु। सोSहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः। नाकस्य पृष्ठमारुह्य गच्छेद् ब्रह्मसलोकताम्। इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमंसचा परुष्णिया। असिक्निया मरुद्वृधे वितस्तयाSSर्जीकीये शृणुह्या सुषोमया। ऋतञ्च सत्य ञ्चा भीद्धात्तपसो ध्यजायत। (8) ततो रात्रिरजायत ततस्समुद्रो अर्णवः समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी। सूर्याच

न्द्रमसौ धाता यथा पूर्वमकल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्षमथो सुवः। यत्पृथिव्याँ रजस्स्वमान्तरिक्षे विरोदसी। इमाँस्तदापो वरुणः पुनात्वघमर्षणः। एष भूतस्य भव्ये भुवनस्य गोप्ता। एष पुण्यकृताँल्लोकानेष मृत्योर् हिरण्मयम्। द्यावापृथिव्योर् हिरण्मयँ सँश्रितँ सुवः।(9) सनस्सुवस्सँशिशाधि। आर्द्रंज्वलतिज्योतिरहमस्मि। ज्योतिर्ज्वलति ब्रह्माहमस्मि। योऽहमस्मि ब्रह्माहमस्मि। अहमेवाहं मां जुहोमिस्वाहा। अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः। वरुणोऽपामघमर्षणस्तस्मात् पापात् प्रमुच्यते। रजो भूमिस्त्वमाँ रोदयस्व प्रवदन्ति धीराः। पुनन्तु ऋषयः पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः। आक्रान् थ्समुद्रः प्रथमे विधर्मञ्जनयन् प्रजा भुवनस्य राजा। (10) वृषापवित्रे अधिसानो अव्ये बृहथ्सोमो वावृधे सुवान इन्दुः। जातवेदसे सुनवामसोममरातीयतो निदहाति वेदः। सनः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुन्दुरिताऽत्यग्निः। तामग्निवर्णां तपसाज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्। दुर्गान्देवीँ शरणमहं प्रपद्ये सुतरसितरसेनमः। अग्ने त्वं पारया नव्यो अस्मान् थ्स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुलान उर्वी भवातोकाय तनयाय शँय्योः। विश्वानिनो दुर्गहाजातवेदस्सिन्धुन्ननावा दुरितातिपर्षि। अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम्। पृतनाजितँ सहमान मग्निमुग्रँ हुवेम परमाथ्सधस्थात्। सनः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः। प्रत्नोषि कमीड्यो अध्वरेषु सनाच्चहोता नव्यश्च सथ्सि। स्वाञ्चाग्ने तनुवं पिप्रयस्वा स्मभ्यञ्च सौभगयायजस्व। (11)

भूरग्नये पृथिव्यै स्वाहा भुवोवायवेऽन्तरिक्षाय स्वाहा सुवरादित्याय दिवे स्वाहा भूर्भुवस्सुवश्चन्द्रमसे दिग्भ्यस्स्वाहा नमोदेवेभ्यस्स्वधा पितृभ्यो भूर्भुवस्सवरग्न ओम्॥(12)

भूरन्नमग्नये पृथिव्यै स्वाहा भुवोऽन्नँवायवेऽन्तरिक्षाय स्वाहा सुवरन्नमादित्याय दिवे स्वाहा भूर्भुवस्सुवरन्नं चन्द्रमसे दिग्भ्यस्स्वाहा नमोदेवेभ्यस्स्वधा पितृभ्यो भूर्भुवस्सुवरन्नमोम्॥ (13)

भूरग्नयेच पृथिव्यै चमहते च स्वाहा भुवो वायवे चान्तरिक्षाय च महते च स्वाहा सुवरादित्याय च दिवे च महते च स्वाहा भूर्भुवस्सुवश्चन्द्रमसे च नक्षत्रेभ्य श्च दिग्भ्यश्च महते च स्वाहा नमोदेवेभ्यस्स्वधा पितृभ्यो भूर्भुवस्सुवर्महरोम्॥ (14)

पाहि नो अग्न एनसे स्वाहा। पाहि नो विश्व वेदसे स्वाहा। यज्ञं पाहि विभावसो स्वाहा। सर्वं पाहि शतक्रतो स्वाहा॥ (15)

यश्छन्दसामृषभो विश्वरूपश्छन्दोभ्यश्छन्दाँस्याविवेश। सतौं शिक्यः पुरो वाचोपनिषदिन्द्रो ज्येष्ठ इन्द्रियाय ऋषिभ्यो नमो देवेभ्यस्स्वधा पितृभ्यो भूर्भुवस्सुवरोम्॥ (16)

नमोब्रह्मणेधारणं मे अस्त्वनिराकरणन्धारयिता भूयासं कर्णयोश्श्रुतं माच्योढ्वं ममामुष्य ओम्॥ (17)

ऋतन्तपस्सत्यन्तपश्श्रुतन्तपश्शान्तन्तपोदानन्तपो यज्ञस्तपो भूर्भुवस्सुवर्ब्रह्मै तदुपास्यैतत्तपः। (18)

यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद् गन्धो वाति यथाऽसि धारां कर्तेऽवहितामवक्रामेद्यद्युवेयुवे हवाविह वदिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मानं जुगुप्सेत्॥(19)

अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः। तमक्रतुं पश्यति वीतशोको धातु : प्रसादान्महिमानमीशम् ।सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषस्समिधस्सप्तजिह्वाः। सप्तइमे लोकायेषु चरन्ति प्राणा गुहाशयान्नि हितास्सप्त सप्त। अतस्समुद्रा गिरयश्च सर्वेऽस्मात्स्य न्दन्तेसिन्धं वस्सर्व रूपाः। अत श्चविश्वाओषधयो रसाश्च येनैष भूतस्तिष्ठ त्यन्तरात्मा। ब्रह्मा देवानां पदवीः कवीनां ऋषिर्विप्राणां महिषो मृगाणाम्। श्येनो गृध्राणाँ स्वधितिर्वनानाँ सोमः पवित्रमत्येति रेभन्। अजामेकाँल्लोहित शुक्लकृष्णां बह्वीं प्रजां जनयन्तीँ सरूपाम्। अजोह्येको जुषमाणोऽनुशेते जहात्येनां भुक्त भोगामजोऽन्यः॥ (20) हँसश्शुचिषद्वसुरन्तरिक्ष सद्धोतावेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृत सद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्। यस्माज्जाता न परा नैव किञ्चनास य आविवेश भुवनानि विश्वा। प्रजापतिः प्रजया सँव्विदानस्त्रीणि ज्योतीँषि स चते सषोडशी। विधर्तारँ हवामहे वसोः कुविद्वनातिनः। सवितारन्नृचक्षसम्। अद्या नो देवसवितः प्रजावथ्सावीस्सौभगम्। परादुष्वप्नियँसुव। विश्वानि देवसवितर्दुरितानि परासुव। यद्भद्रन्तन्म आसुव॥ (21)

मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नस्सन्त्वोषधीः। मधुनक्तमुतोषसि मधुमत्पार्थिवँ रजः। मधुद्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः। घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतमुवस्य धाम। अनुष्वधमावह मादयस्व स्वाहाकृतँव्वृष भवक्षिहव्यम्। समुद्रादूर्मिर्म

धुमौं उदारदुपौंशुना सममृतत्वमानट्। घृतस्य नाम गुह्यँय्यदस्ति जिह्वा देवानाम मृतस्य नाभिः।(22) वयन्नाम प्रब्रवामा घृतेनास्मिन् यज्ञे धारयामानमोभिः। उपब्रह्मा श्रृणवच्छस्यमानञ्चतुश्श्रृङ्गोवमीद् गौर एतत्। चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश। त्रिधाहितं पणिभिर्गुह्यमानङ्गवि देवासोघृतमन्वविन्दन्। इन्द्र एकँ सूर्य एकञ्जजान वेनादेकँ स्वधया निष्टतक्षुः। यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमानँ सनो देवश्शुभया स्मृत्या सँय्युनक्तु। यस्मात्परन्नापरमस्ति किञ्चि द्यस्मान्नाणीयोन ज्यायोऽस्ति कश्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्ये कस्तेनेदं पूर्णं पुरुषेण सर्वम्। (23)

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः।परेणनाकन्निहितङ्गुहायाँव्वि भ्राजते यद्यतयो विशन्ति। वेदान्त विज्ञान सुनिश्चितार्थास्सन्न्यास योगाद्यतयश्शुद्ध सत्वाः। ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे। दहँव्विपाप्मं परवेश्म भूतँय्यत्पुण्डरीकं पुरमध्य सँस्थम्। तत्रापि दहरङ्गगनँव्विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्। यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यः परस्समहेश्वरः॥ (24)

सहस्र शीर्षन्देवँव्विश्वाक्षँव्विश्वशं भुवम्। विश्वन्नारायणन्देवमक्षरं परमं प्रभुम्। विश्वतः परमन्नित्यँव्विश्वन्नारायणँ हरिम्। विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति। पतिँ व्विश्वस्यात्मेश्वरँ शाश्वतँ शिवमच्युतम्। नारायणं महाज्ञेयँव्विश्वात्मानं परायणम्। नारायण परं ब्रह्म तत्वन्नारायणः परः। नारायणपरो ज्योतिरात्मा नारायणः परः। यच्च किञ्चिज्जगत्यस्मिन् दृश्यतेश्रूयतेऽपिवा। अन्तर्बहिश्चतत्सर्वं व्याप्य नारायणस्थितः। (25) अनन्तमव्ययङ्कविँ समुद्रेऽन्तँव्विश्वशं भुवम्। पद्मकोश प्रतीकाशँ हृदयञ्चाप्यधोमुखम्। अधोनिष्ट्या वितस्त्यान्तु नाभ्यामुपरि तिष्ठति। हृदयन्तद्विजानीयाद्विश्वस्यायतनं महत्। सन्ततँ सिराभिस्तुलंबत्या कोशसन्निभम्। तस्यान्ते सुषिरँ सूक्ष्मन्त स्मिन्थ्सर्वं प्रतिष्ठितम्। तस्य मध्ये महानग्नि विश्वार्चिर्विश्वतो मुखः। सोऽग्रभुग्वि भजन्तिष्ठन्नाहारमजरः कविः। सन्तापयति स्वं देहमापादतलमस्तकम्। तस्य मध्येवह्निशिखा अणीयोर्ध्वा व्यवस्थितः। नीलतोयद मध्यस्थाविद्युल्लेखेव भास्वरा। नीवार शूकवत्तन्वी पीता भास्वत्यणूपमा। तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः। स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमस्वराट्॥ (26)

ऋतँ सत्यं परं ब्रह्म पुरुषंकृष्ण पिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षव्विश्वरूपायवै

नमः॥ (27)

आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचस्तदृचा मण्डलँ स ऋचाँल्लोकोऽथ य एष एतस्मिन् मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नाँल्लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिषि पुरुषस्तानि यजूँषि स यजुषा मण्डलँ स यजुषाँल्लोकस्सैषा त्रय्येव विद्यातपति य एषोऽन्तरादित्ये हिरण्मयः पुरुषः॥ (28)

आदित्यो वै तेज ओजोबलं यश श्चक्षुश्श्रोत्रमात्मा मनो मन्युर्मनुर्मृत्युस्सत्यो मित्रो वायुराकाशः प्राणो लोकपालः कः किं तत्सत्यमन्नमायुरमृतोजीवो विश्वः कतमस्स्वयंभुःप्रजापतिस्संवत्सर इति सँव्वत्सरोऽसावादित्यो य एष पुरुष एष भूताना मधिपतिर्ब्रह्मणस्सायुज्यँ सलोकतामाप्नोत्येतासामेव देवतानाँ सायुज्यँ सार्ष्टिताँ समान लोकतामाप्नोति य एवँव्वेदेत्युपनिषत्॥(29)

घृणिस्सूर्य आदित्यो मर्चयन्ति तपस्सत्यं मधु क्षरन्ति तद् ब्रह्म तदाप आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम्॥ (30)

सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु। पुरुषो वै रुद्रस्सन्महो नमो नमः। विश्वं भूतं भुवनं चित्रं बहुधा जातञ्जायमानञ्च यत्। सर्वोह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥ (31)

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वोचेम शन्तमँहृदे। सर्वोह्येष रुद्रस्तस्मै रुद्रायनमो अस्तु॥ (32)

नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिका पतय उमापतये नमो नमः॥(33)

यस्य वै कङ्कत्यग्निहोत्रहवणी भवति प्रतिष्ठिताः प्रत्येवास्याहुतयस्तिष्ठन्त्यथो प्रतिष्ठित्यै॥ (34)

कृणुष्वपाज इति पञ्च॥(35) .

आदितिर्देवा गन्धर्वा मनुष्याः पितरोऽसुरास्तेषाँ सर्व भूतानां माता मेदिनी महती मही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला विश्वाभूता कतमा कायासा सत्येत्यमृतेति वसिष्ठः॥ (36)

आपो वाइदँ सर्वँव्विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽमृतमापोऽन्नमापस्सम्राडापो विराडापस्स्वराडापश्छन्दाँस्यापो ज्योतीँष्यापस्स त्यमापस्सर्वदेवता आपो भूर्भुवस्सुवराप ओम्॥(37)

*आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम्। पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु माम्। यदुच्छिष्टमभोज्यँय्यद्वा दुश्चरितं मम। सर्वं पुनन्तु मामापोऽसताञ्च प्रतिग्रहँ स्वाहा। (38)

*अग्निश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्ताम्। यदह्ना पापम कार्षम्। मनसावाचा हस्ताभ्याम्। पद्भ्यामुदरेण शिश्ना। अहस्त दवलुंपतु। यत्किञ्च दुरितं मयि। इदमहं माममृतयोनौ। सत्ये ज्योतिषि जुहोमि स्वाहा॥ (39)

*सूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्ताम्। यद् रात्रिया पापम कार्षम्। मनसा वाचा हस्ताभ्याम्। पद्भ्यामुदरेण शिश्ना। रात्रिस्त दवलुंपतु। यत्किं च दुरितं मयि। इदमहं माममृतयोनो। सूर्ये ज्योतिषि जुहोमि स्वाहा॥ (40)

*आयातु वरदा देव्यक्षरं ब्रह्म संमितम्। गायत्रीं छन्दसां मातेदं ब्रह्म जुषस्वनः। ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानान्धाम नामासि विश्वमसि विश्वायुर सर्वमसि सर्वायुरभि भूरोम्गायत्रीमावाहयामि॥ (41)

*ओं भूः ओं भुवः ओँ सुवः ओं महः ओंजनः। ओं तपः। ओँ सत्यम्। ओन्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम्॥ (42)

ओं भू र्भुवस्सुवर्महर्जनस्तपस्सत्यन्तद् ब्रह्म तदाप आपोज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम्॥ (43)

ओन्तद् ब्रह्म। ओन्तद्वायुः। ओन्तदात्मा। ओन्तत्सर्वम्। ओन्तत्पुरोर्नमः॥ (44)

*उत्तमे शिखरे देवीभूम्यां पर्वत मूर्धनि। ब्राह्मणेभ्योह्यनुज्ञानं गच्छ देवि यथा सुखम्॥ (45)

ओमन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु। त्वँय्यज्ञस्त्वँव्विष्णुस्त्वँव्वषट्कारस्त्वँ रुद्रस्त्वं ब्रह्मा त्वं प्रजापतिः॥ (46)

अमृतोपस्तरणमसि॥ (47)

प्राणे निविष्टोऽमृतञ्जुहोमि। प्राणाय स्वाहा। अपाने निविष्टोऽमृतञ्जुहोमि। अपानाय स्वाहा। व्याने निविष्टोऽमृतञ्जुहोमि। व्यानाय स्वाहा। उदाने

---

* सन्ध्यावन्दन मन्त्राः

निविष्टोऽमृतञ्जुहोमि। उदानाय स्वाहा। समाने निविष्टोऽमृतञ्जुहोमि। समानाय स्वाहा। ब्रह्मणिम आत्माऽमृतत्वाय। (48)

प्राणे निविष्टोऽमृतञ्जुहोमि। शिवो मा विशाप्रदाहाय। प्राणाय स्वाहा। अपाने निविष्टोऽमृतञ्जुहोमि। शिवो माविशाप्रदाहाय। अपानाय स्वाहा। व्यानेनिविष्टोऽमृ तञ्जुहोमि। शिवो मा विशाप्रदाहाय। व्यानाय स्वाहा। उदाने निविष्टोऽमृतञ्जुहोमि। शि वो मा विशाप्रदाहाय। उदानाय स्वाहा। समाने निविष्टोऽमृतञ्जुहोमि। शिवो मा विशाप्रदाहाय। समानाय स्वाहा। ब्रह्मणि म आत्माऽमृतत्वाय।।(49)

अमृतापिधानमसि।।(50)

श्रद्धायां प्राणे निविश्यामृतँ हुतम्। प्राणमन्नेनाप्यायस्व। अपाने निविश्यामृतँ हुतम्। अपानमन्नेनाप्यायस्व। व्याने निविश्यामृतँ हुतम् व्यानमन्नेनाप्यायस्व। उदाने निविश्यामृतँ हुतम्। उदानमन्ने नाप्यायस्व। समाने निविश्यामृतँ हुतम्। समानमन्नेनाप्यायस्व। ब्रह्मणि म आत्माऽमृतत्वाय।।(51)

प्राणानां ग्रन्थिरसि रुद्रो माऽऽविशान्तकस्तेनान्नेनाप्यायस्व ।।(52)

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः। ईशस्सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक् ।।(53)

मेधादेवी जुषमाणान आगा द्विश्वाची भद्रा सुमनस्यमाना। त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः। त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्माऽऽगत श्रीरुत त्वया। त्वया जुष्टश्चित्रं विन्दते वसु सानो जुषस्व द्रविणोनमेधे ।।(54)

मेधां म इन्द्रो ददातु मेधान्देवी सरस्वती। मेधां मे अश्विनौ देवा वाधत्तां पुष्करस्रजा ।।(55)

अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः। दैवी मेधा मनुष्यजा सा मां मेधा सुरभिर्जुषताम् ।।(56)

आमां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या। ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषताम् ।।(57)

सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमः। भवे भवे नाति भवे भजस्वमां भवोद्भवाय नमः ।।(58)

वामदेवायनमो ज्येष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमस्सर्वभूत दमनाय नमो मनोन्मनाय नमः ।।(59)

अघोरेभ्योऽथ घोरेभ्यो घोर घोरतरेभ्यस्सर्वतश्शर्व सर्वेभ्यो नमस्ते अस्तु रुद्र रूपेभ्यः ॥(60)

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ।(61)

ईशानस्सर्वविद्यानामीश्वरस्सर्व भूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥(62)

ब्रह्ममेतु मां । मधुमेतु मां । ब्रह्ममेव मधुमेतुमां । यास्ते सोमप्रजा वत्सोभिसो अहम् । दुष्वप्न हन्दुरुष्वह ।यास्ते सोमप्राणा ँ स्ताञ्जुहोमि। त्रिसुपर्ण मयाचितं ब्राह्मणाय दद्यात् । ब्रह्महत्याँव्वा एते घ्नन्ति । ये ब्राह्मणास्त्रिसुपर्णं पठन्ति । ते सोम प्राप्नुवन्ति । आसहस्रात् पङ्क्ति पुनन्ति । ओं ॥(63)

ब्रह्म मेधया । मधु मेधया । ब्रह्ममेव मधुमेधया । अद्यानो देवसवितः प्रजावत्सावीस्सौभगम् । परादुष्वप्निय ँ सुव । विश्वानि देवसवित दुरितानि परा सुव । यद्भद्रं तन्म आसुव । मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नस्सन्त्वोषधीः । मधुनक्त मुतोषसि मधुमत्पार्थिव ँ रजः । मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमा ँ अस्तुसूर्यः । माध्वीर्गावो भवन्तु नः । य इमं त्रिसुपर्ण मयाचितं ब्राह्मणाय दद्यात् । भ्रूणहत्याँव्वा एते घ्नन्ति । ये ब्राह्मणास्त्रिसुपर्णं पठन्ति। ते सोमं प्राप्नुवन्ति । आसहस्रात् पङ्क्तिं पुनन्ति। ओम् ॥(64)

ब्रह्म मेधवा । मधु मेधवा । ब्रह्ममेव मधुमेधवा । ब्रह्मा देवानां पदवीः कवीनामृषि विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणा ँ स्वधितिर्वनानाँसोमः पवित्र मत्येति रेभन् । ह ँ सश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वर सदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् । य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । वीरहत्याँव्वा एते घ्नन्ति। ये ब्राह्मणास्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आसहस्रात् पङ्क्ति पुनन्ति । ओम् ॥(65)

प्राणापान व्यानोदान समाना मे शुद्ध्यन्तां ज्योतिरहं विरजाविपाप्मा भूयास ँ स्वाहा ॥(66)

वाङ्मनश्चक्षुश्श्रोत्र जिह्वाघ्राण रेतो बुध्याकूति सङ्कल्पामे शुद्ध्यन्तां ज्योतिरहँव्विरजाविपाप्मा भूयास ँ स्वाहा ॥(67)

शिरः पाणि पाद पार्श्व पृष्ठोदर जङ्घ शिश्ञोपस्थ पायवो मे शुध्यन्तां ज्योतिरहं विरजाविपाप्मा भूयासँस्वाहा ॥(68)

त्वक् चर्म माँस रुधिर मेदोऽस्थि मज्जा मे शुध्यन्तां ज्योतिरहं विरजाविपाप्मा भूयासँस्वाहा ॥(69)

शब्द स्पर्श रूप रस गन्धा मे शुध्यन्तां ज्योतिरहँ व्विरजाविपाप्मा भूयासँस्वाहा॥(70)

पृथिव्यप् तेजो वाय्वाकाशा मे शुद्ध्यन्तां ज्योतिरहं व्विरजा विपाप्मा भूयासँस्वाहा॥(71)

अन्नमय प्राणमय मनो मय विज्ञानमयानन्दमयामे शुध्यन्तां ज्योतिरहँव्विरजाविपाप्मा भूयासँस्वाहा ॥(72)

विविट्ट्यै स्वाहा ॥(73)

घषोत्काय स्वाहा ॥(74)

उत्तिष्ठ पुरुष हरीलोहित पिङ्गलाक्षि देहि देहि ददापयिता मे शुद्ध्यन्तां ज्योतिरहं व्विरजाविपाप्मा भूयासँ स्वाहा ॥(75)

ओँ स्वाहा ॥(76)

सत्यं परंपरँ सत्यँ सत्येन न सुवर्गाल्लोकाच्च्यवन्ते कदाचन सताँ हि सत्यन्तस्मात्सत्ये रमन्ते तप इति तपो नानशनात्परँय्यद्धि परन्तपस्तद् दुर्धर्षन्तद्दुरा धर्षं तस्मात्तपसि रमन्ते दम इति नियतं ब्रह्मचारिणस्तस्माद्दमे रमन्ते शम इत्यरण्ये मुनयस्तस्माच्छमे रमन्ते दानमिति सर्वाणि भुतानि प्रशँसन्ति दानान्नाति दुष्करं तस्माद्दाने रमन्ते धर्म इति धर्मेण सर्वमिदं परिगृहीतन्धर्मान्नाति दुश्चरन्तस्माद् धर्मे रमन्ते प्रजन इति भूयाँ सस्तस्माद् भूयिष्ठाः प्रजायन्ते तस्माद् भूयिष्ठाः प्रजनने रमन्तेऽग्नय इत्याह तस्मादग्नय आधातव्या अग्निहोत्रमित्याह तस्मादग्निहोत्रे रमन्ते यज्ञ इति यज्ञेनहि देवा दिवङ्गतास्तस्माद्यज्ञे रमन्ते मानसमिति विद्वाँसस्तस्माद्विद्वाँस एव मानसे रमन्ते न्यास इति ब्रह्मा ब्रह्माहि परः परो हि ब्रह्मा तानि वा एतान्यवराणि तपाँसि न्यास एवात्यरेचयद् य एवँव्वेदेत्युपनिषत् ॥(77)

प्राजापत्यो हारुणिस्सुपर्णे यः प्रजापतिं पितरमुपससार किं भगवन्तः परमँव्वदन्ती ति तस्मै प्रोवाच सत्येन वायुरावाति सत्येनादित्यो रोचते दिवि सत्यँव्वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं वदन्ति तपसा देवा देवतामग्र आयन्तपसर्षयस्सुवरन्वविन्दन् तपसा सपत्नान् प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमँव्वदन्ति दमेन दान्ताः किल्विषमवधून्वन्ति दमेन ब्रह्मचारिणस्सुवरगच्छन्

दमो भूतानान्दुराधर्षंदमे सर्वं प्रतिष्ठितं तस्माद्दमः परमं वदन्ति शमेन शान्ता
शिशवमाचरन्ति शमेन नाकं मुनयोऽन्वविन्दन् शमो भूतानान्दुराधर्षँ शमे सर्वं
प्रतिष्ठितं तस्माच्छमः परमं वदन्ति दानँय्यज्ञानाँव्वरूथं दक्षिणा लोकेदातारँ सर्व
भूतान्युपजीवन्ति दानेनारा तीरपानुदन्त दानेन द्विषन्तो मित्रा भवन्ति दाने सर्वं
प्रतिष्ठितंतस्माद्दानं परमँव्वदन्ति धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा
उपसर्पन्ति धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमँव्वदन्ति प्रजननँ
व्वै प्रतिष्ठा साधु प्रजायास्तन्तुन्तन्वानः पितृणामनृणो भवति तदेव तस्यानृणं
तस्मात्प्रजननं परमँव्वदन्त्यग्नयो वै त्रयी विद्या देवयानः पन्था गार्हपत्य ऋक् पृथिवी
रथन्तरमन्वा हार्य पचनो यजुरन्तरिक्षँव्वाम देव्यमाहवनीयस्साम सुवर्गो लोको
बृहत्तस्मादग्नीन् परमँव्वदन्त्यग्निहोत्रँ सायं प्रातर्गृहाणान्निष्कृतिस्स्विष्टँ सुहुतँय्यज्ञ
क्रतूनां प्रायणँ सुवर्गस्य लोकस्य ज्योतिस्तस्मादग्नि होत्रं परमँव्वदन्ति यज्ञ इति यज्ञेन
हि देवा दिवङ्गता यज्ञेनासुरानपानुदन्त यज्ञेन द्विषन्तो मित्रा भवन्ति यज्ञे सर्वं प्रतिष्ठितं
तस्माद्यज्ञं परमँव्वदन्ति मानसँव्वै प्राजापत्यं पवित्रं मानसेन मनसा साधु पश्यति
मानसा ऋषयः प्रजा असृजन्त मानसे सर्वं प्रतिष्ठितं तस्मान्मानसं परमं व्वदन्ति
न्यास इत्याहु र्मनीषिणो ब्रह्माणं ब्रह्मा विश्वः कतमस्स्वयंभुः प्रजापतिस्संव्वथ्सर
इति सँव्वथ्सरो ऽसावादित्यो यएष आदित्ये पुरुषस्स परमेष्ठी ब्रह्मात्मा
याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षतिपर्जन्येनौषधि वनस्पतयः प्रजायन्त
ओषधि वनस्पतिभिरन्नं भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा
श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा शान्तिश्शान्त्या चित्तश्चित्तेन
स्मृतिँ स्मृत्या स्मारँ स्मारेण विज्ञानँव्विज्ञानेनात्मानँव्वे दयति तस्मादन्नन्ददन्
थ्सर्वाण्येतानि ददात्यन्नात्प्राणा भवन्ति भूतानां प्राणैर्मनो मनसश्च विज्ञानँव्विज्ञानादानन्दो
ब्रह्मयोनिस्सवा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी
चान्तरिक्षञ्च द्यौश्च दिश श्चावान्तर दिशाश्च सवै सर्वमिदं जगत्सच भूतँ स
भव्यञ्जिज्ञासक्लृप्त ऋतजा रयिष्ठा श्रद्धा सत्यो महस्वान्तमसो वरिष्ठाद् ज्ञात्वा
तमेवं मनसा हृदा चभूयोन मृत्युमुपयाहि विद्वान् तस्मान्न्यास मेषान्तपसामति
रिक्तमाहुर्वसुरण्वो विभूरसि प्राणे त्वमसि सन्धाता ब्रह्मन् त्वमसि विश्वसृक् तेजोद
स्त्वमस्यग्नेर्वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमस उपयामगृहीतोऽसि
ब्रह्मणे त्वामहस ओमित्यात्मानँय्युञ्जीतैतद्वै महोपनिषदं देवानाङ्गुह्यँय्य
एवँव्वेद ब्रह्मणो महिमानमाप्नोति तस्माद् ब्रह्मणो महिमानमित्युपनिषत् ॥(78)

तस्यैवँव्विदुषो यज्ञस्यात्मा यजमानश्श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदश्शिखाहृदयँय्यूपः काम आज्यं मन्युः पशुस्तपोऽग्निश्शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद्यावद्ध्रियते सा दीक्षा यदश्नाति यत्पिबति तदस्य सोमपानँ यद्रमते तदुपसदो यत्सञ्चरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधो यत्सायं प्रातर्मध्यन्दिनञ्च तानि सवनानि ये अहोरात्रे ते दर्श पूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये सँव्वत्सराश्च परिवत्सरा श्च तेऽहर्गणास्सर्व वेदसँव्वा एतत्सत्रँयन्मरणं तदवभृथ एतद्वै जरामर्यमग्निहोत्रँ सत्रँय्य एवँव्विद्वानुदगयने प्रमीयते देवानामेव महिमानँ गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानङ्गत्वा चन्द्रमसस्सायुज्यं गच्छत्येतौ वै सूर्या चन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद् ब्रह्मणो महिमा नमाप्नोति तस्माद् ब्रह्मणो महिमानमित्युपनिषत् ॥(79)

सहनाववतु । सहनौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ओं शान्तिश्शान्तिश्शान्तिः ॥

॥ हरिः ओ(3)म् ॥

॥ तैत्तिरीयोपनिषदि द्वितीयः प्रश्नस्समाप्तः ॥

॥ तैत्तिरीयोपनिषत् समाप्ता ॥